## PART—IV / भागः —IV

### LANGUAGE—I / भाषा—I
### Sanskrit / संस्कृतम्

| |
|---|
| अभ्यर्थिनः **चतुर्थभागस्य** (Part–IV) प्रश्नानाम् (प्र० सं० **91–120**) उत्तराणि दद्युः, यदि तैः **संस्कृतं प्रथमभाषा** (Language—I)-रूपेण चितम्। |

**निर्देशः** —अधोलिखितान् पद्यान् पठित्वा प्रश्नानां **(91–96)** विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चिनुत।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्॥1॥
यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि॥2॥
तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते॥3॥
सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः॥4॥
यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः।
तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत्॥5॥

**91.** 'वर्षशतैरपि' इत्यस्य पदस्य सम्यक् सन्धिविच्छेदः कुरुत।
(1) वर्षश + तैरपि
(2) वर्षशतै + रपि
(3) वर्षशतैः + अपि
(4) वर्ष + शतैरपि

**92.** तेष्वेव त्रिषु तुष्टेषु सर्वं किं समाप्यते?
(1) वित्तम्
(2) आकर्षणम्
(3) तपः
(4) दुःखम्

**93.** 'निष्कृतिः' इत्यस्मिन् पदे कः प्रत्ययः वर्तते?
(1) क्तिन्
(2) तसिल्
(3) क्विप्
(4) णिनि

**94.** मातापितरौ नृणां सम्भवे किं सहेते?
(1) घृणाम्
(2) स्वत्वम्
(3) प्रसन्नताम्
(4) क्लेशम्

**95.** परितोषात्मकं कर्म करणार्थं जनैः किं कर्तव्यम्?
(1) परिहारः
(2) प्रयत्नम्
(3) प्रमादः
(4) उपहासः

**96.** अभिवादनशीलस्य किं न वर्धते?
(1) धनम्
(2) विद्या
(3) आयुः
(4) यशः

97. भाषाकक्षायां साहित्यिकपाठानां अध्यापनविषये अधोलिखितेषु किं कथनं सत्यं न अस्ति?

(1) साहित्यिकपाठैः आलोचनात्मक-विचारशीलतायाः चिन्तनस्य च विकासं भवति
(2) साहित्यिकपाठाः गुण-दोष-विवेचनाय (appreciation) आनन्दार्थं च भवन्ति
(3) साहित्यिकपाठाः व्याकरणाध्यापनाय प्रयोज्याः
(4) साहित्यिकपाठाः भाषा-अधिगमे सांस्कृतिकनिविष्टयः (cultural inputs) भवन्ति

98. षष्ठकक्षायाः छात्रः नवीनः पाठस्य पठने काठिन्यम् अनुभवति। अध्यापिका तस्मै पठितुं सरलतरं पाठं ददाति। सा तस्मै छात्राय सामूहिक-पठनसत्राणां आयोजनम् अपि करोति। अध्यापिकया प्रदत्ता सहायता किं कथ्यते?

(1) मस्तिष्कोद्दोलनम् (Brainstorming)
(2) परिचयात्मक-गतिविधिः/संकोचनिवारण-गतिविधिः (ice-breaking)
(3) पठनस्य सज्जीकरणम् (Reading readiness)
(4) सोपाननिर्माणम् (Scaffolding)

99. भाषायाः अध्ययन-अध्यापनविषये कः उपागमः स्वीकरोति यत् भाषा एका वृत्तिः (habit) अस्ति?

(1) नैसर्गिक-उपागमः (Natural approach)
(2) सहयोगात्मक-भाषापठनम्
(3) श्रव्यभाषिकतावादः (Audiolingualism)
(4) सम्प्रेषणात्मकभाषाध्यापनम्

100. एकः छात्रः अपठितानुच्छेदं पठति, तस्मात् च सः प्रश्नानां उत्तराणि दातुं अपेक्ष्यते। पठनस्य अयं प्रकारः अभिकथ्यते—

(1) द्रुतपठनम् (Skimming)
(2) विस्तारक-पठनम् (Extensive reading)
(3) क्रमवीक्षणम् (Scanning)
(4) व्यावर्तक-पठनम् (Exclusive reading)

101. अध्यापिका छात्रान् पञ्च चित्राणि दर्शयति। सा तेषु चित्रेषु आधारितां एकां कथां लिखितुं निर्दिशति।
एतत् _____ इत्यस्य उदाहरणम् अस्ति।

(1) सामूहिक-पठनम् (Shared reading)
(2) रचनात्मक-लेखनम् (Creative writing)
(3) प्रदर्शनं कथनम् च (Show and tell)
(4) खण्डित-श्रुतलेखः (Jigsaw dictation)

102. भाषायां प्रदर्शनाधारित-आकलनस्य अधोलिखितेषु का एका विशिष्टता अस्ति?

(1) असंदर्भिकृत-परीक्षाविषयाः (Decontextualized test items)
(2) संदर्भिकृत-सम्प्रेषणात्मककार्यम्
(3) बहुविकल्पात्मकप्रश्नाः (Multiple-choice questions)
(4) वार्तालापरहितं प्रदर्शनम् (Non-interactive performance)

103. अधोलिखिते कथने पठ्येताम्—

A : पठनं केवलं वर्ण-ध्वनि-सम्बन्धं अधिगन्तुं वर्णान् च शुद्धरूपेण उच्चरितुं भवति।
B : पठनं अर्थग्रहणाय संकेतानां निष्कूटनम् (decoding) अस्ति।

उपयुक्तं विकल्पं चिनुत—

(1) B सत्यम् अस्ति परन्तु A सत्यं न अस्ति
(2) द्वे A, B सत्ये न स्तः
(3) द्वे A, B सत्ये स्तः
(4) A सत्यम् अस्ति परन्तु B सत्यं न अस्ति

104. एका अध्यापिका स्वछात्राणां श्रवणकौशलम् आकलयितुं इच्छति। श्रवणाकलनाय तया अधोलिखितेषु कः गतिविधिः चयनीयः?

(1) अध्यापिका छात्रान् एकां कथां पठितुं निर्दिशति, तदनन्तरं च सा अवबोधारितान् प्रश्नान् पृच्छति
(2) अध्यापिका शब्दावलि-आधारितान् कार्यान् ददाति
(3) छात्रेभ्यः मौखिकप्रस्तुति-आधारित-वरीयताप्रदानम् (Rating the children on oral presentation)
(4) अध्यापिका एकां कथां कथयति, तदनन्तरं सा छात्रान् अवबोधारितान् प्रश्नान् पृच्छति

105. _____ भाषायां अर्थपक्षैः सह सम्बद्धः अस्ति।

(1) वाक्यविज्ञानम् (Syntax)
(2) रूपविज्ञानम् (Morphology)
(3) स्वनिक् (Phonetics)
(4) अर्थविज्ञानम् (Semantics)

**106.** अधोलिखितेषु किं भाषाधिगमस्य सिद्धान्तः न अस्ति?

(1) भाषा सम्प्रेषणाय एकं साधनं अस्ति

(2) भाषा, संरचनानां/व्याकरणनियमानां कण्ठस्थीकरणेन अधिगम्यते

(3) भाषाधिगमे द्वे—कौशलनैपुण्यं ज्ञाननैपुण्यं च समाविष्टे स्तः

(4) छात्राः स्वरुच्यनुसारं अधिगमस्य उपागमप्रयोगे भिन्नाः भवेयुः

**107.** षष्ठ कक्षायाः अध्यापिका श्यामपट्टस्य केन्द्रभागे एकं शब्दं लिखति। सा छात्रान् तेषां संभाव्यशब्दानां विषये मस्तिष्कोद्वेलन (Brainstorming) कर्तुं कथयति ये शब्दाः केन्द्रलिखितेन शब्देन सम्बद्धाः भवेयुः।

अस्य गतिविधेः मुख्यः उद्देश्यः अस्ति—

(1) व्याकरणस्य अवबोधः

(2) पठनकौशलवर्धनम्

(3) लेखनकौशलवर्धनम्

(4) छात्राणां शब्दावलि-संवर्धनम्

**108.** अधोलिखिते कथने पठ्येताम्—

कथनं (A) : प्रारम्भिकवर्षेषु भाषाधिगमे विलम्बेन छात्राः नवीनभाषाणां शिक्षणे काठिन्यम् अनुभवन्ति।

क़ारणम् (R) : छात्रस्य प्रारम्भिकवर्षाः भाषाधिग्रहणाय संवेदनशील-अवधिः भवति।

उपयुक्तं विकल्पं चिनुत—

(1) A सत्यं न अस्ति, R सत्यम् अस्ति

(2) A सत्यम् अस्ति R सत्यं न अस्ति

(3) A एवं R द्वे सत्ये स्तः, R इति च A इत्यस्य सम्यक् व्याख्या अस्ति

(4) A एवं R द्वे सत्ये स्तः, R इति च A इत्यस्य सम्यक् व्याख्या न अस्ति

**109.** बहुभाषिकताप्रसङ्गे आधारभूतस्तरार्थं (2022) राष्ट्रीयपाठ्यचर्यारूपरेखायाः प्रमुखसिद्धान्तेषु एकः अस्ति—

(1) बहुभाषिकतायाः संज्ञानात्मकः (cognitive) सामाजिकः/सांस्कृतिकः च लाभः वर्तते

(2) स्वगृहभाषां विस्मृतीकरणे छात्राणां सहायतां कर्तव्या, विद्यालयस्य केन्द्रबिन्दुः (focus) च विद्यालयीयभाषाशिक्षणे भवेत्

(3) कक्षायां बहुभाषिकता प्रभाविपाठ्यक्रमसम्पादने बाधारूपेण वर्तते

(4) छात्राः प्रारम्भिकवर्षेषु बहुमौखिकभाषाः शिक्षितुं समर्थाः न भवन्ति

**110.** कतिपयभाषासमुदायेषु भाषायाः द्वयोः भिन्नप्रकारयोः सहास्तित्वं वर्तते। प्रत्येकभाषायाः सामाजिकप्रकार्ये (social function) विशिष्टपरासः (distinct range) अस्ति। स्थितिरियं कथ्यते—

(1) द्विभाषारूपिता (Diglossia)

(2) उपभाषा (Dialect)

(3) कूट-सम्मिश्रणम् (Code-mixing)

(4) प्रयुक्तिः (Register)

**111.** छात्राः युग्मेषु कार्यं कुर्वन्ति। एकः पाठः द्वयोः भागयोः विभक्तः। एकः छात्रः स्वपाठिने पाठं पठति अन्यः छात्रः च तं लिखति। छात्रेभ्यः द्वौ छात्रौ समग्र-पाठं पूर्णं कुरुतः। अयं गतिविधिः कथ्यते—

(1) आंशिक-श्रुतलेखः (Partial dictation)

(2) कथावाचनम् (Storytelling)

(3) शृंखलित-श्रुतलेखः (Running dictation)

(4) शब्द-जालम् (Word web)

**निर्देशः** —अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (**112–120**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चिनुत।

पूर्वं दक्षिणप्रदेशे एकः त्यागराजः नामा विद्वान् आसीत्। तस्य पुत्री ज्ञानाम्बा अतीव बुद्धिमती आसीत्। तस्याः बुद्धिमत्वकारणात् एव तस्यै वरः दुर्लभः आसीत्। कश्चिदपि ज्ञानेन तस्याः समतां न अकरोत्। एकदा तस्याः पित्रा त्यागराजेन पार्श्वस्थग्रामस्य कश्चित्-पण्डितपुत्रः वररूपेण अन्विष्टः ज्ञानाम्बां च तस्य विषये असूचयत्। परन्तु ज्ञानाम्बा उक्तवती यत् अहं स्वयमेव तं द्रक्ष्यामि, प्रश्नं च प्रक्ष्यामि। ज्ञानाम्बायाः वाक्यं श्रुत्वा त्यागराजः चिन्तितोऽभवत्। तदा एकस्मिन् दिवसे सः वरस्य ग्रामं गत्वा तस्य पितरं ज्ञानाम्बायाः विचारम् अकथयत्। तस्य पिता ज्ञानाम्बायाः बुद्धिमत्वम् अजानत्। यद्यपि सः स्वपुत्रस्य ज्ञानविषये आश्वस्तो न आसीत्, तथापि तेन ज्ञानाम्बायाः साक्षात्कारार्थं स्वीकृतिः प्रदत्ता।

अथ निश्चिते दिने सः पण्डितः स्वपुत्रेण सह त्यागराजकवेः गृहम् आगतः। प्रणामानन्तरं ज्ञानाम्बा स्वपितरम् अवदत् यत् उभौ एव भवन्तौ पृथक् कक्षे तिष्ठताम्। अहम् अत्र एव द्वित्रान् सरलप्रश्नान् प्रक्ष्यामि।



शिक्षा जगत राजस्थान के Telegram Channel से जुड़ने के लिए टेलीग्राम ऐप पर सर्च करें
@shiksha_jagat_rajasthan

ज्ञानाम्बाकथनानुसारं त्यागराजः वरपितरं गृहीत्वा अन्यस्मिन् कक्षे अगच्छत्। ज्ञानाम्बा तं युवकं तस्य नाम अपृच्छत्। सः च 'बोधराजः' इति स्वनाम अवदत्। तदा ज्ञानाम्बा अपृच्छत्—अयि भोः व्याकरणं तु जानासि? तेन उक्तम्—आं जानामि। मम अयं प्रश्नः ''एकः बालकः विहस्य मातरं पृच्छति—अम्ब, मां विहाय कुत्र गच्छसि'' इति कृपया 'विहस्य विहाय' इति पदयोः व्याकरणपरिचयः दीयताम्। पण्डितसूनुः अवदत्—स्पष्टमेव अत्र क्रमशः षष्ठी च चतुर्थी च विभक्तिः दृश्यते।

ज्ञानाम्बया उक्तं बाढम्, तर्हि 'अहं कथम्' इति पदयोः तु द्वितीया-विभक्तिः भवेत्?

युवकः अवदत्—सत्यमुक्तं त्वया 'एवमेवास्ति।' ज्ञानाम्बया कथितम्—क्षणं तिष्ठतु भवान्, अहं किञ्चित् भोजनमानयामि। युवकोऽवदत्—नैव नैव, पित्रा सह गन्तव्यमस्ति।

अस्मिन्नन्तरे त्यागराजः बोधराजपित्रा सह आगतः। तदा त्यागराजेन पृष्टं जाते! तव प्रश्नानामुत्तराणि कथं दत्तानि? ज्ञानाम्बा स्मयमाना आसीत्। त्यागराजः कथितवान्—सम्यग् उत्तराणि दत्तानि, इति मन्ये। तदा ज्ञानाम्बा इमं श्लोकमवदत्—''यस्य षष्ठी चतुर्थी च, विहस्य विहाय च।''

अहं कथं द्वितीया स्यात्, द्वितीया स्याम् अहं कथम्॥

एतच्छ्रुत्वा त्यागराजः निराशः अभवत्। हस्तयोः शिरः गृहीत्वा निम्नमुखः उपाविशत्। सः चिन्तितः आसीत्—किं कर्त्तव्यं कोऽपि ज्ञानवान् युवकः न दृश्यते?

वस्तुतः विदुष्यः युवतयः समानं वरमिच्छन्ति।

**112.** अधोलिखितेषु किं पदं क्त्वतुप्रत्ययान्तं अस्ति?
(1) ज्ञानवान्
(2) कथितवान्
(3) विहाय
(4) गृहीत्वा

**113.** वस्तुतः विदुष्यः युवतयः कीदृशं वरम् इच्छन्ति?
(1) सुशीलम्
(2) बुद्धिहीनम्
(3) दीर्घकायम्
(4) समानम्

**114.** ज्ञानविषये इत्यस्मिन् पदे कः समासः वर्तते?
(1) द्विगुः
(2) कर्मधारयः
(3) अव्ययीभावः
(4) तत्पुरुषः

**115.** 'स्वीकृतिः' अस्मिन् पदे कः प्रत्ययः अस्ति?
(1) तुमुन्
(2) शानच्
(3) क्तिन्
(4) घञ्

**116.** बोधराजस्य पिता ज्ञानाम्बायाः किं गुणं जानाति स्म?
(1) बुद्धिमत्वम्
(2) सुन्दरताम्
(3) हास्यप्रियताम्
(4) गृहकार्ये कुशलताम्

**117.** निश्चिते दिने सः पण्डितः केन सह त्यागराजस्य गृहं आगतः?
(1) पशुभिः
(2) मित्रैः
(3) स्वपरिवारेण
(4) स्वपुत्रेण

**118.** ''अहं किञ्चित् भोजनमानयामि''—एतत् कथनं कः कं कथयति?
(1) त्यागराजः ज्ञानाम्बाम्
(2) ज्ञानाम्बा बोधराजम्
(3) ब्राह्मणः स्वपुत्रम्
(4) ज्ञानाम्बा ब्राह्मणम्

**119.** ज्ञानाम्बायाः वाक्यं श्रुत्वा त्यागराजः ______ अभवत्।
उचितं पदं चित्वा रिक्तस्थानं पूरयत।
(1) क्रुद्धः
(2) खिन्नः
(3) निराशः
(4) प्रसन्नः

**120.** पण्डितपुत्रस्य अनुसारं विहस्य विहाय च एतयोः पदयोः का विभक्तिः दृश्यते?
(1) षष्ठी च चतुर्थी च
(2) षष्ठी च प्रथमा च
(3) पञ्चमी च द्वितीया च
(4) तृतीया च सप्तमी च

# PART—V / भागः —V

## LANGUAGE—II / भाषा—II

## Sanskrit / संस्कृतम्

अभ्यर्थिनः **पञ्चमभागस्य** (Part–V) प्रश्नानाम् (प्र० सं० **121–150**) उत्तराणि दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा** (Language—II)-रूपेण चितम्।

**निर्देशः** —अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (**121–127**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चिनुत।

कस्मिंश्चित् वृक्षे कश्चित् काकः निवसति। एकदा सः तृषार्तः भवति। सः जलार्थं यत्र-तत्र अटति। किन्तु कुत्रापि जलं न लभते सः। तृषाव्याकुलः सः पुनश्च जलम् अन्वेष्टुं गच्छति। सः कमपि लघुघटं पश्यति। तस्मिन् घटे अल्पं जलमस्ति। काकः चतुरः अस्ति। सः पाषाणखण्डान् आनीय घटे निक्षिपति। यदा घटः पाषाणैः पूर्णः तदा जलम् उपरि आगच्छति। काकः जलं पिबति। तदा कश्चित् हंसः एतद् सर्वम् अवलोकयति। सः आश्चर्येण तं काकं पृच्छति। भो मित्र, त्वम् एतावान् तृषार्तः तथापि किमर्थम् अर्धमेव जलं पीतवान् तव तृष्णा अपि शान्ता? काकः ईषद् हसति वदति च—रे वयस्य, भाग्यवान् असि त्वं यतो हि सरसि निवससि। नास्ति तत्र जलस्य अभावः अतः एव भवान् जलस्य महत्त्वं न जानाति। जलं विना अस्माकं जीवनम् अशक्यम्। हंसः वदति, ''जानामि अहम्। अतएव 'जलं जीवनम्' इति उच्यते। जलं देवतारूपेण पूज्यते।'' काकः वदति, ''एतद् जलम् ईश्वरस्य महत् वरदानम्। किन्तु सीमितं, परिमितं वरदानम्। नूनं राष्ट्रिया सम्पत्तिः एषा। तस्याः रक्षणम् अस्माभिः करणीयम्। अतः अहम् अर्धं जलं पीत्वा अर्धं त्यक्तवान् मत्सदृशः अन्यः कोऽपि तृषार्तः तद् जलं पिबतु इत्येव मम विचारः।''

हंसः भणति—''भो मित्र, धन्योऽसि त्वम्। तव वर्णः कृष्णः किन्तु मनः धवलम्। सत्यं तव वचनम्। अस्माभिः सर्वैः जलस्य माहात्म्यम् अवगन्तव्यं न तस्य अतिव्ययः विनाशः वा करणीयः। अहं सर्वान् वयस्यान् जलस्य महत्त्वं कथयिष्यामि।

जलं नाम महद्रत्नं भूमौ देवेन निर्मितम्।
रक्षेत् प्रदूषणनाशात् तत्संवर्धयेत् मतिमान्नरः॥''

अर्थात् ईश्वरेण अस्यां भूमौ जलनाम निधिः रचितः। अस्य संरक्षणं संवर्धनं च अस्मभ्यं पर कर्तव्यं अस्ति।

**121.** गद्यानुसारं कस्य वर्णः कृष्णः, किन्तु मनः धवलं अस्ति?

(1) कृष्णस्य
(2) सर्पस्य
(3) काकस्य
(4) पिकस्य

**122.** अधोलिखितेषु पदेषु किं अव्ययपदं न अस्ति?

(1) अपि
(2) तदा
(3) तस्यै
(4) कुत्र

**123.** अस्माभिः सर्वैः जलस्य किं न कर्तव्यम्?

(1) अतिव्ययः
(2) संरक्षणम्
(3) प्रदूषणात् रक्षणम्
(4) संवर्धनम्

**124.** यद्यपि 'जलमेव जीवनम्' इति उच्यते, तथापि केचन जनाः अस्य किं न जानन्ति?

(1) स्वादम्
(2) महत्त्वम्
(3) गन्धम्
(4) वर्णम्



शिक्षा जगत राजस्थान के Telegram Channel से जुड़ने के लिए टेलीग्राम ऐप पर सर्च करें
@shiksha_jagat_rajasthan

125. ''किमर्थं अर्धमेव जलं पीतवान्'' इति एनं प्रश्नं कः कं पृच्छति?

(1) मित्रः जलम्
(2) हंस काकम्
(3) जलं हंसम्
(4) काकः जलम्

126. 'अवगन्तव्यम्' इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः?

(1) यत्
(2) ष्यञ्
(3) ण्यत्
(4) तव्यत्

127. जलं ईश्वरस्य महत् वरदानं, नूनं ____ सम्पत्तिः एषा।

उचितं पदं चित्वा रिक्तस्थानं पूरयत।

(1) राष्ट्रिया
(2) शासकीया
(3) स्थानीया
(4) स्वकीया

128. कक्षायां भाषिकवैविध्यं स्वीकरणेन किं भविष्यति?

(1) भाषाधिगमे कश्चित् प्रभावो न वर्तते
(2) छात्राणाम् आत्मविश्वासस्य वर्धनं, येन तेषां कल्पनाशीलतायाः रचनात्मकतायाः च वर्धनं भवति
(3) भाषाप्रवाहशीलतायाः अधिग्रहणे बाधा
(4) छात्राणाम् आत्मविश्वासस्य ह्रासः येन तेषां कल्पनाशीलतायां रचनात्मकतायां च न्यूनता भवति

129. उदीयमानसाक्षरतायाः भागरूपेण अधोलिखितेषु का मुद्रणबोधस्य (print awareness) एका विशेषता न वर्तते?

(1) पठनं वाम-दक्षिणरीत्या शीर्ष-निम्नरीत्या च क्रियते
(2) पूर्णवाक्यानां पठनस्य आरम्भः
(3) एकस्य पुस्तकस्य संधारणम् (Handling a book)
(4) वर्णानां शब्दानां च मध्ये भेदाभिज्ञानम्

130. आधारभूतस्तरे पठनकौशलस्य अधिगम-परिणामाः अधोदत्ताः —

A. उपयुक्त-अनुतानं—विरतिः —बलाघातपरिवर्तनम् इत्यादिभिः युक्तं लघुगद्यांशं विशुद्धरूपेण प्रवाहशीलतया च पठति
B. ज्ञातशब्दयुक्तान् कतिपयान् वाक्यान् विशुद्धरूपेण पठति
C. उपयुक्त-अनुतानेन (intonation) विरतिभिः (pauses) युक्तान् लघुगद्यांशान् पठति

उपरिलिखितान् वाक्यान् आरोही-क्रमे संयोजयत।

(1) A, C, B
(2) C, A, B
(3) A, B, C
(4) B, C, A

131. अधोलिखितेषु कः विस्तारकपठनस्य (extensive reading) भागः न अस्ति?

(1) अनुमानकरणम् (Inferences)
(2) विशिष्टतथ्यार्थं सूचनार्थं च श्रवणम्
(3) सारांशकृते श्रवणम् (Listening for the gist)
(4) प्रमुखविचारार्थं श्रवणम्



4840327

132. अधोलिखितेषु कार्येषु पठनकौशलस्य आकलनार्थं किं प्रयोक्तुं न शक्यते?
(1) चित्रसंकेतितशब्दस्य अभिज्ञानम्
(2) अध्यापिकया कथावाचनसंत्रम्
(3) उच्चस्वरेण पठनम्
(4) पठितपाठाधारिताः बहुविकल्पात्मकप्रश्नाः

133. अधोलिखितेषु केन कथनेन शृंखलित-श्रुतलेखः (running dictation) सम्यक्तया परिभाष्यते?
(1) छात्राः युग्मेषु कार्यं कुर्वन्ति। धाविछात्रः (runner) पाठं प्रति अनुगच्छति, तं सहभागिनं च कथयति। तदा सहभागी पाठं लिखति।
(2) अध्यापिका कक्षायां शब्दस्य/पाठस्य वाचनं करोति छात्राः तं लिखन्ति च।
(3) छात्राः पाठस्य विविधान् अंशान् शृण्वन्ति पठन्ति वा। अनन्तरं ते कार्यं पूर्णीकर्तुं अन्यैः सह सूचनायाः आदान-प्रदानं कुर्वन्ति।
(4) छात्राः युग्मेषु कार्यं कुर्वन्ति। एकः पाठः द्वयोः भागयोः विभक्तः। एकः छात्रः सहभागिने पाठं पठति यम् अन्यः छात्रः लिखति। छात्रेषु द्वौ छात्रौ समग्रपाठं पूर्णं कुरुतः।

134. एकः बालकः भाषाधिग्रहणे अन्तर्जातसामर्थ्येन सह उत्पन्नः भवति। भाषाधिग्रहणविषये अयं विचारः केन समर्थितः?
(1) सामाजिक-अन्तर्क्रियावादी (Social-interactionist)
(2) व्यवहारवादी (Behaviourist)
(3) देशीयतावादी (Nativist)
(4) संज्ञानवादी (Cognitivist)

135. प्रक्रियालेखन-उपागमे (approach) लेखनप्रक्रियायाः तत्त्वं यस्य अन्तर्गते लेखकः औपचारिकरूपेण स्वकार्यं बृहत्श्रोतागणस्य समक्षं प्रस्तौति—
(1) सम्पादनम् (Editing)
(2) संशोधनम् (Revising)
(3) प्रारूपणम् (Drafting)
(4) प्रकाशनम् (Publishing)

136. एके पाठे कठिनशब्दान् प्रयोक्तुम्, एका भाषाध्यापिका प्रथमं शब्दान् मातृभाषायां परिवर्तयति। तदा छात्रान् तान् शब्दान् कण्ठस्थीकर्तुं निर्दिशति। तया कस्य प्रयोगः क्रियते?
(1) संरचनात्मक-उपागमः
(2) सम्प्रेषणात्मक उपागमः
(3) व्याकरणानुवादपद्धतिः
(4) प्रत्यक्षपद्धतिः (Direct method)

137. एकः छात्रः कस्यापि सहायता विना एकं कार्यं कर्तुं शक्नोति, अपि च ते प्रौढानां, सक्षमतरसहपाठिनां वा साहाय्येन एकं कार्यं कर्तुं शक्नुवन्ति—एतयोः द्वयोः मध्ये आगतं अन्तरालं किं कथ्यते?
(1) उपलब्धि-क्षेत्रम्
(2) अन्तरित-अधिगमः (Distance learning)
(3) प्रौढता-स्तरः (Level of maturity)
(4) समीपस्थविकासस्य क्षेत्रम् (Zone of proximal development)

138. स्थानीयमस्तिष्कक्षतिकारणेन भूयमाना भाषाक्रियायाम् एका विकृतिः येन अवबोधने, भाषिकरूपाणां रचनायां च/वा काठिन्यम् अनुभूयते, कथ्यते—
(1) डिस्कैलकुलिया
(2) डिसर्थ्रिया
(3) ऐफेसिया
(4) डिस्लेक्सिया

[ P.T.O.



4834032751

**139.** एका प्रक्रिया, यया भाषा एकस्मात् वंशात् (generation) अन्यं वंशं प्राप्नोति, कथ्यते—

(1) यादृच्छिकता (Arbitrariness)
(2) विस्थापनम् (Displacement)
(3) सांस्कृतिक-सञ्चरणम्
(4) उत्पादकता

**140.** द्वादश-अष्टादश-मासपर्यन्तं बालकाः विविधम् अभिज्ञेयम् एकशब्दयुक्तोच्चारणम् उत्पादयितुं प्रारभन्ते। अयं कालः, यस्मिन् दैनिकवस्तुभ्यः एकः शब्दः प्रयुज्यते, कथ्यते—

(1) बहुसंश्लेषणात्मक स्तरः (Holophrastic stage)
(2) त्रुटितवाक् (Babbling)
(3) अव्यक्तवाक् (Cooing)
(4) तार-संभाषणम् (Telegraphic speech)

**141.** अधोलिखिते कथने पठ्येताम्—

A : पठनावबोधेन, पठनसामर्थ्येन च लेखनयोग्यता प्रभाविता भवति।

B : पठनं लेखनं च पृथक् पृथक् प्रक्रिये स्तः। एते स्वतन्त्ररूपेण विकसतः।

उपयुक्तं विकल्पं चिनुत—

(1) A, B द्वे असत्ये स्तः
(2) A असत्यम् अस्ति, B च सत्यम् अस्ति
(3) A, B द्वे सत्ये स्तः
(4) A सत्यम् अस्ति B च असत्यम् अस्ति

**142.** सर्वासां भाषाणां कतिपयाः निश्चितसामान्यविशेषताः भवन्ति, ताः कथ्यन्ते—

(1) प्रयुक्तिः (Register)
(2) उपभाषा (Dialect)
(3) द्विभाषारूपिता (Diglossia)
(4) भाषायाः सामान्यसिद्धान्ताः (Language universals)

**निर्देशः** —अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (**143–150**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चिनुत।

अस्मिन् भौतिकवादियुगे मानवाः भौतिकम् उन्नतिं कर्तुम् उद्यताः सन्ति। विज्ञानबलेन ते ईश्वरम् अपि जेतुम् इच्छन्ति, किन्तु तथापि न अस्ति शान्तिः कुत्रचित्। एकः एकस्य स्वार्थ-हननं करोति, एकस्य उन्नतिम्, अन्यः न सहते। सर्वत्र चिन्ता विपन्नता कलहश्च लक्ष्यते। धर्ममूलकभावनायाः अभावः एव अस्य मूलकारणम् अस्मिन् युगे परलोकस्य चर्चा अपि मूर्खता कथ्यते। मा भवतु परलोकः। नास्ति कश्चित् लोकः किन्तु मनुष्यजीवनस्य यत् कीर्तिक्षेत्रं तदेव परलोकः अस्ति। तस्य मरणानन्तरं तस्य सत्कार्यदुष्कार्याणां ध्यानं कृत्वा जगत् तस्य स्तुतिं निन्दां यत् करोति तदेव परलोकः अस्ति। तस्य नाम चिरस्मरणीयं विस्मरणीयम् वा भवति तदेव परलोकः अस्ति। तस्मात् कारणात् सद्भावना सत्कर्म च अपेक्ष्यते। तदेव धर्मः।

रक्षितः धर्मः रक्षां करोति। ब्राह्मे मुहूर्ते उत्थातव्यम् इति धर्मः, तस्य रक्षया स्वास्थ्यलाभः भवति। प्रातः स्नानं कृत्वा ईश्वरस्य चिन्तनं कर्तव्यम् इति धर्मः, तस्य पालनेन मनः विमलं भवति। गुरोः शुश्रूषया विद्या भवति इति धर्मः, तस्य पालनेन विद्यायाः लाभः भवति। छात्राणाम् अध्ययनं तपः इति धर्म, तस्य पालनेन लोकः विद्वान् भवति। अतः रक्षितः धर्मः रक्षां करोति।

प्राणान् त्यक्तत्वा अपि धर्मस्य रक्षा कर्तव्या। यः धर्मम् आचरति, विपत्तौ अपि च धर्मं न त्यजति, धर्मः तं संततं रक्षति। यः च धर्मस्य आचरणं न करोति, न च तं रक्षति, धर्मः तं नाशयति। अतः धर्मः न हातव्यः न च हन्तव्यः अपितु सततं रक्षितव्यः इदम् एव तथ्यं प्रकाशयता भगवता मनुना भणितम्—

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।
तस्माद् धर्मो न हन्तव्यः मा नो धर्मो हतोऽवधीत्॥

संसारे सः देशः सा जातिः ते च जनाः एव जीवन्ति येषां धर्मः जीवितः अस्ति। धर्ममार्गे बहूनि कष्टानि समापतन्ति, किन्तु तानि सर्वाणि सहमानः यः धर्मात् न विचलति, सफलता तस्य एव चरण-चुम्बनं विदधाति। इतिहासः साक्षी अस्ति यत् सर्वदा सर्वत्र धर्मस्य एव विजयः भवति। किम् अधिकं रामस्य, कृष्णस्य, पाण्डवानाम् अन्येषां च धर्मयुद्धरतानां विजयः वस्तुतः धर्मस्य एव विजयः अस्ति।

धर्मः मानवस्य सार्वकालिकम् मित्रम् अस्ति। सुखे-दुःखे, सम्पत्तौ-विपत्तौ, जीवने-मरणे, लोके-परलोके च धर्मः एव परमसहायकः अस्ति। धनानि, पशवः, गृहाणि, शकटानि, नार्यः पुत्राः सखायः अन्ये च सर्वे बान्धवाः सम्बन्धिनः च मरणोत्तरं मानवस्य साहाय्यं त्यजन्ति किन्तु एकः धर्मः एव परलोके अपि तम् अनुगच्छति।

**143.** सफलता कस्य जनस्य चरण-चुम्बनं विदधाति?

(1) यः नित्यरूपेण व्यायामं करोति
(2) यः स्वगुरूणां प्रशंसां करोति
(3) यः सर्वदा प्रातःकाले उत्तिष्ठति
(4) यः धर्मात् न विचलति

**144.** निम्नलिखितेषु पदेषु किं पदं ल्युट्प्रत्ययान्तं न अस्ति?

(1) हननम्
(2) आचरणम्
(3) कृष्णम्
(4) चिन्तनम्

**145.** मरणोत्तरं के परलोके अपि मानवं अनुगच्छन्ति?

(1) सम्बन्धिनः
(2) धर्मः
(3) शकटानि
(4) पशवः

**146.** मानवाः केन उपायेन ईश्वरं जेतुं प्रयतन्ते?

(1) विज्ञानबलेन
(2) शारीरिकशक्त्या
(3) प्रार्थनाभिः
(4) वित्तप्रयोगेन

**147.** जनैः धर्मस्य रक्षा कान् अपि त्यक्त्वा कर्तव्या?

(1) भोजनम्
(2) नैतिकमूल्यान्
(3) गृहान्
(4) प्राणान्

**148.** धर्मः कुत्र मानवस्य परमसहायकः न भवति?

(1) परलोके
(2) पापकर्मसु
(3) दुःखे
(4) सम्पत्तौ

**149.** मनुष्यजीवनस्य यत् ______ तदेव परलोकः अस्ति।
उचितं पदं चित्वा रिक्तस्थानं पूरयत।

(1) कीर्तिक्षेत्रम्
(2) भैषजविद्या
(3) विद्यानैपुण्यम्
(4) सङ्गीतज्ञानम्

**150.** अस्मिन् भौतिकतावादियुगे सर्वत्र किं न लक्ष्यते?

(1) विपन्नता
(2) कलहः
(3) शान्तिः
(4) चिन्ता